# नाट्यशास्त्रे रससिद्धान्तस्य मनोवैज्ञानिकं विश्लेषणम्

मकवाणा सीमाबेन राजेशः
*श्रीसोमनाथसंस्कृतविश्वविद्यालयः – वेरावलम्*

doi.org/10.64643/IJIRTV12I8-191051-459

**शोधसारः भरतमुनिकृतं नाट्यशास्त्रं भारतीयकलापरम्परायाः प्रमुखः आधारस्तम्भः। अत्र प्रतिपादितः रससिद्धान्तः केवलं साहित्यिकः सौन्दर्यशास्त्रीयः च सिद्धान्त एव न, अपितु मानवमनोविज्ञानस्य एकः प्राचीनः सूक्ष्मः च विश्लेषणोऽपि वर्तते। अस्य सिद्धान्तस्य मूलम् अस्ति "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" इति सूत्रम्। रसस्य मनोवैज्ञानिकम् आधारं नव स्थायिभावाः (रतिहासशोकक्रोधोत्साहभयजुगुप्साविस्मयशमाः) स्वीकुर्वन्ति। ये समस्तमानवचेतसि सुप्तावस्थायां संस्काररूपेण स्थिताः। नाट्यकाव्यादिकलाकृतेः सम्पर्केण एतैः विभावैः उद्बुद्धाः भूत्वा अनुभावैः व्यभिचारिभिः च संयुक्ताः सन्तः सहृदये आस्वाद्यमानाः रसात्मकं परिणामं जनयन्ति। अस्य प्रक्रियायाः केंद्रीयं मनोवैज्ञानिकं सिद्धान्तं 'साधारणीकरणम्' इति। कलाप्रस्तुतौ दर्शकः स्वकीयां वैयक्तिकताम् अतिक्रम्य सामान्यमानवभावस्य साक्षात्कारं करोति। एषा तादात्म्यावस्था मनसः विस्तारं संवेगानां शोधनं (कैथार्सिस्) च सम्पादयति। अन्तिमः फलः 'ब्रह्मानन्दसहोदरः' आनन्दः भवति। यः आत्मिकः निर्वैयक्तिकः च भवन् मानसिकं समाधानं ददाति। आधुनिकमनोविज्ञानदृष्ट्या स्थायिभावाः कार्लयुङ्गस्य अनुसारम् 'आर्केटाइप्' इव सामूहिकचेतनायाः अङ्गानि सन्ति। रसानुभूतिः मास्लो-वर्णितां (पीक् एक्स्पीरियन्स्) परमानुभूतिं स्मारयति। अभिनयमनोविज्ञाने कलाचिकित्सायां संवेगबोधने च अस्य सिद्धान्तस्य प्रासङ्गिकता अद्यापि स्पष्टा वर्तते। निष्कर्षतोऽयं सिद्धान्तः मानवचित्तस्य संवेदनात्मकजगतः एकं समग्रं वैज्ञानिकं च मानचित्रं प्रस्तौति। सः प्राचीनभारतीयानां मनोवैज्ञानिकगाम्भीर्यस्य कलायाः चिकित्सिकशक्तेः च सजीवः साक्षी अस्ति। एषः केवलं कलासिद्धान्तः न अपितु जीवनशिल्पस्य मनोवैज्ञानिकः आधारोऽपि वर्तते।**

**कूटशब्दाः - साधारणीकरणम्, ब्रह्मानन्दसहोदरः, सामूहिकचेतनायाः, संवेदनात्मकजगतः**

## प्रस्तावना

मानवमनसः विभिन्नानां भावात्मकस्थितीनां काव्यरूपेण प्रदर्शनमेव नाट्यकाव्ययोः अन्तिमं लक्ष्यम्। तस्मात् नाट्यं काव्यं तयोः मूलतत्त्वं च रसः भावे एव प्रतिष्ठिताः। मानवस्य अन्तर्जगत् विविधानुभूतिमनोवृत्तिमनोविकारैः व्याप्तम्। अन्तर्मनसः अध्ययनशास्त्रं मनोविज्ञानं तेषां परिभाषापरिगणनादिभिः सीमासु निबध्य अध्ययनं प्रयतितवत्, तथापि स्वभावतः तेषां रूपं विस्तृतं बह्वर्थकं च जातम्। मनोभावानां काव्ये नाट्ये च रूपं 'भावः' इत्युच्यते यः लौकिकमनोवैज्ञानिकाधारेऽपि ततोऽत्यन्तं भिन्नः। सः लोके मनोविज्ञाने इव काव्यशास्त्रेऽपि बहुषु अर्थेषु प्रयुक्तः। अतः विषयस्य महत्त्वं प्रयोगस्य च विवादपूर्णां बह्वर्थकतां दृष्ट्वा भावस्य स्वरूपनिर्धारणम् आवश्यकं भवति।

भरतमुनिकृतनाट्यशास्त्रं भारतीयकलापरम्परायाः मूलग्रन्थः। अत्र नाट्यस्य सर्वाङ्गीणं विवेचनं प्राप्यते। भरतमुनिप्रणीते 'नाट्यशास्त्रे' रससूत्रे

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः"
(नाट्यशास्त्रम् ६.३१)

प्रतिपादितम्। यः केवलं काव्यनाट्यकलामार्गदर्शक एव न, अपितु गम्भीरमनोवैज्ञानिकसिद्धान्तोऽप्यस्ति। अस्य सिद्धान्तस्य मूलं 'साधारणीकरणम्' इति मनोवैज्ञानिकक्रियायाम् अस्ति। सामान्यमानवस्य हृदये स्थायिभावाः सुप्तावस्थायां तिष्ठन्ति। कलाकृतेः सहृदयसम्पर्केण ते उद्बुद्धाः भूत्वा रसरूपेण परिणमन्ते। एषः पूर्णः प्रक्रियाः मानसिकस्तरे भवति।

भरतमुनिना रससिद्धान्तस्य मूलतत्त्वानि प्रदतानि - यथा नवरसाः- शृङ्गारः हास्यः करुणः रौद्रः वीरः भयानकः बीभत्सः अद्भुतः शान्तः च परिगणिताः। प्रत्येकस्य रसस्य चत्वारः अङ्गानि सन्ति-

१.स्थायिभावः (मूलभावः- यथा रतिः शोकः क्रोधः च)

 ISSN: 2349-6002

२.विभावः (कारणम्- आलम्बनविभावः उद्दीपनविभावः च)

३.अनुभावः (प्रतिक्रिया- शारीरिक-वाचिक अभिव्यक्तिः)

४.व्यभिचारिभावः (सहचारिभावाः, अस्थायिसंवेगाः)

एषा संरचना स्पष्टतया मनोवैज्ञानिकक्रियाप्रक्रियां प्रतिबिम्बति। स्थायिभावाः एवं रसस्य मनोविज्ञानं भरतमुनिः नव स्थायिभावान् निर्दिशति – रतिः हासः शोकः क्रोधः उत्साहः भयं जुगुप्सा विस्मयः शमः च। एते सर्वेऽपि मानवमनसः मूलभूताः सञ्चितसंस्काररूपेण वर्तन्ते। रससिद्धान्तस्य मनोवैज्ञानिकं रहस्यम् अस्ति यत् काव्यनाट्यादिषु विभावानुभावव्यभिचारिसंयोगेन एते स्थायिभावाः जाग्रतः सन्तः सहृदये 'रसात्मकानन्दम्' उत्पादयन्ति। अयमानन्दः सामान्यजगतः व्यावहारिकसुखदुःखेभ्यः भिन्नः आत्मिकः निर्वैयक्तिकः च भवति।

साधारणीकरणस्य सिद्धान्तः एषः रससिद्धान्तस्य केन्द्रीयः मनोवैज्ञानिक आधारः। नटः यदि स्वस्य वैयक्तिकशोकं रौदिति, तर्हि तत् केवलं तस्यैव शोकः स्यात्। परन्तु यदि सः नाट्यरेखानुसारं विभावानुभावसहितं सामान्यमानवस्य शोकभावं प्रस्तौति, तर्हि दर्शकः स्वकीयव्यक्तित्वं विस्मृत्य तत्र तादात्म्यं साधयति। एवं वैयक्तिकं सामान्ये परिणमति। इदमेव 'साधारणीकरणम्'। फ्रायड्-युंग्-आदिपश्चिममनोवैज्ञानिकसिद्धान्तैः सह अस्य तुलनां कृत्वा दर्शयितुं शक्यते यत् भरतस्य 'स्थायिभावाः' युंगस्य 'आर्केटाइप्' इव सामूहिकचेतनायाः अङ्गानि सन्ति, ये समस्तमानवानां मनसि सामान्यरूपेण विद्यन्ते।

विभाव-अनुभाव-व्यभिचारिसंयोगः रसोत्पत्तेः या त्रिसूत्री, सा मनोवैज्ञानिकप्रक्रियायाः सूक्ष्मविश्लेषणम्। विभावाः बाह्यनिमित्तानि (पात्रं वातावरणं घटनाश्रृङ्खला इत्यादयः), यानि मनसि संस्काररूपेण स्थितान् स्थायिभावान् उद्दीपयन्ति। अनुभावाः बाह्याभिव्यक्तयः (अश्रूणि हासः कम्पनम् इत्यादयः) ये भावोद्रेकस्य फलम्। अभिनये सर्वैः सूक्ष्मस्थूलाङ्गप्रयोगैः नाटकीयानां बहूनाम् अर्थानां (भावरसानां) श्रोतृणां सभ्यानां वा हृदयेषु सम्यक् अनुभवः रसानाम् आस्वादः वा सम्पाद्यते, सः एव "अभिनयः" इति व्यवह्रियते।

व्यभिचारिणः चञ्चलमनोभावाः (निर्वेदः आवेगः त्रासः इत्यादयः) ये स्थायिनं परिवेष्ट्य तं पुष्णन्ति। एषा सम्पूर्णा गतिः मानसिकस्तरं प्रति भवति। यत्र बाह्यप्रेरकाणाम् आन्तरिकप्रतिक्रियाणां च सुनियोजितः प्रवाहः रसानुभूतिं जनयति। रसानुभूतेः परिणामः 'आनन्दः'(कैवल्यसदृशः) इति नाम्ना विशिष्टः आत्मिकः सुखभावः। भरतः अस्य आनन्दस्य व्याख्यां "ब्रह्मानन्दसहोदरः" इति करोति। मनोवैज्ञानिकदृष्ट्या एषः आनन्दः सहृदयस्य चेतनायाः विस्तारेण भवति। वैयक्तिकसीमां लङ्घ्य सामान्यमानवतायाः अनुभूतौ सः तदाकारो भवति। अत्र मनः विश्रान्तिं प्राप्नोति, संवेगानां शोधनं भवति, चित्तं शुद्धं भवति। अयं भावः मास्लो-महोदयस्य 'अनुभूतिपरमावस्था' (Peak Experience) इत्यनेन सह समानतां धरति।

➢ रसानुभूतेः मनोवैज्ञानिकं स्वरूपम्

- भावनासिद्धान्तैः सम्बन्धः

पाश्चात्यमनोविज्ञाने विलियम जेम्स,कार्ल लैङ्गे इत्यादिभिः प्रतिपादितः “भावनासिद्धान्तः” (James-Lange theory of emotion) अनुसारं शारीरिकपरिवर्तनानाम् अनुभूतिः एव भावना। एवमेव नाट्यशास्त्रेऽपि विभाव-अनुभावयोः संयोगेन स्थायिभावः रसतां प्राप्नोति। अर्थात् बाह्यकारकैः (विभावैः) शारीरिकप्रतिक्रियाः (अनुभावाः) जनिताः ताः च मनसि स्थायिभावं रसरूपेण परिणमयन्ति।

- संज्ञानात्मकसिद्धान्तेन सादृश्यम्

शाचटर-सिङ्गरस्य “द्विअङ्गीसिद्धान्तः” (Two-factor theory) कथयति यत् भावना उद्दीपनस्य शारीरिकसक्रियायाः तस्य संज्ञानात्मकव्याख्यायाः फलितम्। नाट्यशास्त्रेऽपि विभावः (उद्दीपनम्) अनुभावः (शारीरिकप्रतिक्रिया) व्यभिचारिभावैः सह संयोगः (संज्ञानात्मकसंस्कारः) इति रसनिष्पत्तेः प्रक्रिया तादृशी एव।

- सार्वभौमिकभावानां सिद्धान्तम्

१९७०-तमे दशके मनोवैज्ञानिकः पॉल् एक्मान् नामकः षड् मूलभूतान् भावान् अभिज्ञातवान्। तेन प्रतिपादितं यत् एते भावाः सर्वासु मानव-संस्कृतिषु सार्वभौमिकतया अनुभूयन्ते। तेन निर्दिष्टा भावाः आसन् -आनन्दः शोकः जुगुप्सा भयं विस्मयः तथा क्रोधः। एते भावाः अस्माकं विकल्पान् कर्माणि च धारणाश्च प्रभावयितुं समर्थाः सन्ति। भरतमुनिना नव रसाः अपि तादृशानां सार्वभौमिकमानवीयभावनानां सूक्ष्मविस्तारः एव यत्र शान्तिः (समाधानम्) अतिरिक्तरूपेण समाविष्टा।

- सहानुभूतिः (Empathy) सह सम्बन्धः

दर्शकः नायकस्य स्थितिं प्रति सहानुभूतिम् अनुभवति। स च अभिनय-कथावस्तु-वातावरणादिभिः प्रेरितः। एषा प्रक्रिया आधुनिक-मिरर न्यूरॉन्-सिद्धान्तेन (mirror neuron theory) स्पष्टा, यत् अन्येषां क्रियाः दृष्ट्वा अस्माकं मस्तिष्के तादृशाः क्रियाः करोति एवं भावनानाम् अनुकरणं भवति।

- शुद्धिः (Catharsis) अरिष्टोटल-सिद्धान्तेन साम्यम्

अरिष्टोटल्-मतेनाटकं दर्शकेषु करुणभयानकयोः भावनानां शोधनं (catharsis) करोति। नाट्यशास्त्रेऽपि रसास्वादः मनसः शोधनं परिष्कारं च करोति इति सूच्यते। भरतः नाट्यं "दृष्टिश्रव्यवेदोपदेशं" इति कथयति यस्मात् मानवमनः उन्नतभावैः परिपूर्णं भवति।

- ध्यानं तथा समावेशः (Immersion)

रसास्वादः एकप्रकारस्य 'ध्यानावस्था' (flow state) अस्ति, यत्र दर्शकः काल-स्थान-सीमाः विस्मरति, नाटकीयवास्तविकतायां लीनः भवति। आधुनिकमनोविज्ञाने इदं 'नैरेटिव् ट्रान्स्पोर्टेशन्' (narrative transportation) इति उच्यते।

- व्यभिचारिभावानां मनोवैज्ञानिकी भूमिका

एते ३३ अस्थायिभावाः (यथा निर्वेद ग्लानि शङ्का असूया) मानवमनसः जटिलतां प्रतिबिम्बयन्ति। एते आधुनिक-'मूड्' (mood) तथा 'अफेक्टिव् स्टेट्स्' (affective states) इव सन्ति, ये प्रमुखभावनां (स्थायिभावान्) सूक्ष्मी कुर्वन्ति, यथार्थतां च ददति। एतेषां समावेशः एव रससिद्धान्तं यान्त्रिकं न मनोवैज्ञानिकसत्योपेतं च करोति।

नाट्यशास्त्रीयमनोविज्ञानं तथा आधुनिकं मनोविज्ञानं भरतस्य रससिद्धान्तः केवलं सैद्धान्तिकः नास्ति अपितु प्रयोगसिद्धः। अस्य सिद्धान्तस्य प्रयोगः नाट्याभिनये रंगमञ्चसज्जायां साहित्यरचनायां सङ्गीते च विस्तृतरूपेण दृश्यते। अद्यत्वेऽपि चिकित्सामनोविज्ञाने (Clinical Psychology), संवेगबोधने (Emotional Intelligence), कलाचिकित्सायां (Art Therapy) च अस्य सिद्धान्तस्य उपयोगः सम्भाव्यते। 'संवेगशोधनम्' (Catharsis) इति पाश्चात्यसिद्धान्तः भरतस्य रससिद्धान्तेन पूर्णतया समर्थ्यते।

## निष्कर्षः

भरतमुनिनाप्रतिपादितः रससिद्धान्तः केवलं साहित्यसिद्धान्तः न, अपितु मानवमनः क्रियाणां सूक्ष्मः वैज्ञानिकः चिरस्थायी च विश्लेषणः अस्ति। अत्र मनोविज्ञानं तत्त्वज्ञानं कलाचातुर्यं च एकत्रीभूतानि। 'साधारणीकरणम्' इति यत् मनोवैज्ञानिकं सूत्रम्। तस्य साहाय्येन व्यक्तिः स्वकीयां वैयक्तिकतम् अतिक्रम्य विश्वमानवतायाः अनुभूतौ लीयते। एषः एव अस्य सिद्धान्तस्य शाश्वतः योगदानः। अतः नाट्यशास्त्रं प्राचीनं मनोविज्ञानग्रन्थः अपि वर्तते। यस्मिन् मानवचित्तस्य गहनानि रहस्यानि निहितानि सन्ति।

## सन्दर्भग्रन्थसूची


[1] १.नाट्यशास्त्र, प्रधानसम्पादक- प्रो.मिथिलाप्रसाद त्रिपाठी, कालिदास संस्कृत अकादमी-उज्जैन, प्रथम संस्करण- २००८

[2] २.नाट्यशास्त्रीय मूलतत्त्वों की विकास परम्परा, लेखक-कुसुम भूरिया दत्ता, प्रतिभा प्रकाशन, प्रथम संस्करण- 2012

[3] ३.ભરતનું નાટ્યશાસ્ત્ર, અધ્યાય-૬ અભિનવભારતી સહિત (ગુજરાતી ભાષાંતર અને 'હર્ષવતી' ટીકા સાથે) લેખક -ડૉ. તપસ્વી નાન્દી,સંસ્કૃત વિભાગ, ભાષા-સાહિત્ય ભવન ગુજરાત યુનિવર્સિટી-અમદાવાદ, પ્રથમ આવૃત્તિ-૧૯૭૯

[4] ४.संस्कृतनाट्य :अभिनय एवं पटकथा-लेखन ,लेखिका- डॉ० मीरा द्विवेदी, परिमल पब्लिकेशन्स - दिल्ली, प्रथम संस्करण : वर्ष 2018

[5] ५.भारतीय नाट्य परम्परा और अभिनयदर्पण, वाचस्पति गैरोला, चौखम्बा संस्कृत प्रतिष्ठान- दिल्ली, पुनर्मुद्रित संस्करण 2013

[6] ६.संस्कृत काव्य शास्त्रीय भावों का मनोवैज्ञानिक अध्ययन लेखक- डॉ. हरिदत्त शर्मा, चौखम्भा ओरियन्टालिया- वाराणसी ,प्रथम संस्करण : १६८३

[7] https://psychology.iresearchnet.com/social-psychology/emotions/facial- feedback-hypothesis/.

ISSN: 2349-6002

[8] https://www.verywellmind.com/the-two-factor-theory-of-emotion-2795718
[9] https://www.verywellmind.com/an-overview-of-the-types-of-emotions-4163976
[10] https://en.wikipedia.org/wiki/Collective_unconscious#:~:text=In%20psychology%2C%20the%20collective%20unconsciousness,from%20birth%20in%20all%20humans.
[11] https://www.google.com/search?q=mirror+neuron+theory+in+hindi&sca_esv=9437bc439e189606&rlz=1C1YTUH_enIN1180IN1180&sxsrf=AE3TifPdZCjuGYIZdGEVNwiZDcFbJftnnA%3A1767693984144&ei=oN5caZ7HCMGZseMPjv3QiA4&oq=mirror+neuron+theory+in+hi&gs_lp=Egxnd3Mtd2l6LXNlcnAiGm1pcnJvciBuZXVyb24gdGhlb3J5IGluIGhpKgIIADIFECEYoAEyBRAhGKABMgUQIRigATIFECEYoAFIwkJQQFiELnABeAGQAQCYAd4BoAGrCaoBBTAuNC4yuAEByAEA-AEBmAIHoALtCcICChAAGLADGNYEGEfCAgsQABiABBiRAhiKBcICBhAAGBYYHsICCxAAGIAEGIYDGIoFwgIIEAAYgAQYogSYAwCIBgGQBgiSBwUxLjQuMqAHvSGyBwUwLjQuMrgH6AnCBwkwLjIuNC4wLjHIBzSACAA&sclient=gws-wiz-serp&zx=1767693995297&no_sw_cr=1